अस्मिन् प्रश्नपत्रपुस्तिकायाम् 28 प्रश्नाः [खण्ड-क (20)+खण्ड-ख (4+4) एवं 8 पृष्ठाः सन्ति।

Roll No. अनुक्रमांङ्क

Code No. कोड नं. **62/SS/N/S**

Set/सेट **A**

# संस्कृतम्

# (309)

Day and Date of Examination :
परीक्षादिवसः दिनाङ्कश्च ______________________

Signature of Invigilators :
निरीक्षकयोः हस्ताक्षरम्
1. ______________________
2. ______________________

**सामान्य अनुदेशाः-**

1. परीक्षार्थी प्रश्नपत्रपुस्तिकायाः प्रथमपृष्ठे स्व-अनुक्रमाङ्कम् अवश्यं लिखतु।
2. निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारं सन्ति न वा इत्यपि निरीक्षणीयम्।
3. उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति।
4. स्व-उत्तरपुस्तिकायां प्रश्नपत्रस्य कोड संख्या **62/SS/N/S**, सेट **A** अवश्यमेव लेखनीया।

# संस्कृतम्
# (309)

समयः - होरात्रयम् ]　　　　[ पूर्णाङ्काः - 100

**निर्देशाः-**
(i) अस्मिन् प्रश्नपत्रे **द्वौ** खण्डौ स्तः। खण्ड-क (केन्द्रिकः पाठ्यक्रमः), खण्ड-ख (वैकल्पिक-I एवं वैकल्पिक-II) स्तः।

(ii) खण्ड-क **अनिवार्यः**। अस्मिन् खण्डे 20 प्रश्नाः सन्ति।

(iii) खण्ड-ख **एकः** एव वैकल्पिकः समाधेयः।

(iv) खण्ड-क कृते 85 अङ्काः, खण्ड-ख संस्कृतं संस्कृतिश्च अथवा प्रयोजनमूलकसंस्कृतम् इति वैकल्पिकयोः केवलम् एकः एव वैकल्पिकः समाधेयः। अस्य कृते 15 अङ्काः निर्धारिताः।

## खण्ड - क
## केन्द्रिकः पाठ्यक्रमः

**1.** अधोलिखितेषु कस्यचिदेकस्य पाठस्य सारं षड्वाक्येषु लिखत - **6**

(क) राजते खलु कन्याकुमारी

(ख) कल्पनाकीर्तिः विजयते

(ग) अनन्तः ज्ञानसागरः

**2.** अधोलिखितं गद्यांशं पठित्वा प्रश्नान् संस्कृतेन उत्तरत - **1x4=4**

तस्मिन् समये राक्षसः समागत्य प्रसन्नवदनं पुरुषं दृष्ट्वा विस्मितस्तं वदति-भो महासत्त्व। अत्र शिलायां प्रतिदिनं यः उपविशति स मदागमनात् पूर्वमेव म्रियते। त्वं पुनः महाधैर्यसम्पन्नः प्रसन्नवदनः दृश्यसे। यस्य मरणकालः समायाति तस्येन्द्रियाणि ग्लानिं प्राप्नुवन्ति। त्वं पुनरधिकां कान्तिं प्राप्य प्रहससि।

**प्रश्नाः** -

(क) राक्षसः कीदृशं पुरुषं दृष्ट्वा विस्मितः ?

(ख) शिलायाम् उपविष्टः जनः राक्षसागमनात् पूर्वमेव किमर्थं म्रियते ?

(ग) कस्येन्द्रियाणि ग्लानिं प्राप्नुवन्तिं ?

(घ) प्रसन्नवदनः पुरुषः कां प्राप्य प्रहसति ?

3. अधोलिखितानां प्रश्नानाम् उचितमुत्तरं कोष्ठकात् चित्वा लिखत – 1x4=4

(क) कीदृशं पर्यावरणं मानवजीवनाय अपेक्षितं भवति? (स्वच्छं/दूषितं)

(ख) भोजराजस्य मस्तिष्कस्य शल्यक्रियां क: अकरोत? (जीवक:/सुश्रुत:)

(ग) जीवविज्ञानस्यग्रन्था: केषां विषये सूचनां प्रयच्छन्ति? (वनस्पतीनां/नक्षत्राणां)

(घ) कीदृशी बुद्धि: आत्मदोषं न पश्यति? (कुपिता/कलुषिता)

4. (क) रेखाङ्कित पदमाश्रित्य प्रश्ननिर्माणं कुरुत – 1x2=2

(i) द्वीपं परित: सागराणां शोभा अवर्णनीया।

(ii) आचार्यस्य उपदेशा: उपासितव्या:।

(ख) प्रश्नान् उत्तरत – 1x2=2

(i) कस्मिन् केन्द्रे कल्पना चावलाया: नियुक्ति: जाता?

(ii) कस्मिन् देशे शैवालघोषो नाम पर्वत: अस्ति?

5. एतत् कथनं क: कम्प्रति कथयति? 2

(क) भो:, कथं मम राज्ये निर्धन:।

(ख) सावेगमिव मे हृदयम्। गच्छ, यथानिर्दिष्टौ चाणूरमुष्टि कौ प्रवेशय।

6. अधोलिखितं श्लोक**द्वयं** पठित्वा प्रश्नान् उत्तरत – 2+2=4

(क) अहिंस्र: सर्वभूतेषु सत्यवाक् सुदृढ़ व्रत:।
संचकार यथाकालमाहारं पतितै: फलै:।।

**प्रश्नद्वयम्** –

(i) गोमायु: सर्वभूतेषु अहिंसक: कथमासीत्?

(ii) तस्य भोजनं किमासीत्?

(ख) दु:खेन श्लिष्यतेभिन्नम् श्लिष्टं दु:खेन भिद्यते।
भिन्ना श्लिष्टातु यामैत्री न सा स्नेहेन वर्तते।।

**प्रश्नद्वयम्** –

(i) दु:खेन किं भिद्यते?

(ii) भिन्ना श्लिष्टा मैत्री कीदृशी भवति?

7. अधोलिखितयो: अन्वयद्वयो: रिक्तस्थानपूर्तिं कुरुत – **2**

(क) युधिष्ठिर: कस्य पुत्रो गंगा वहति कीदृशी।

हंसस्य शोभाकावास्ति, धर्मस्य त्वरिता गति:।।

अन्वय:-

युधिष्ठिर: वै कस्य पुत्र: धर्मस्य, गंगा कीदृशी वहति __________, हंसस्य शोभा का अस्ति?

(ख) जायते सौकुमार्यम् च, बलं स्थैर्यम् च पादयो:।

दृष्टि: प्रसादम् लभते, मरुतश्चोपशाम्यति।।

अन्वय:-

पादयो:, सौकुमार्यम् बलम् __________ च जायते। दृष्टि: प्रसादम् __________ मरुत: च उपशाम्यति।

8. अधोलिखितपद्यांशद्वयस्य भावार्थयो: रिक्त स्थानानि पूरयत – **2**

(क) अनुव्रत: पितु: पुत्र: माता भवतु संमना:।

भावार्थ: –

पुत्र: पितु: आज्ञाकारीस्यात् माता च यथा चिंतयति

**तथा**

(ख) कार्यापेक्षा: हि वर्तन्ते भावस्निग्धा: सुदुर्लभा:।

भावार्थ: –

शुद्धभावेन स्वामिहित कारका: जना: __________ एव भवन्ति।

9. पद्यांशं '**अ**' स्तम्भात् '**ब**' स्तम्भेनसह मेलयत – **2**

| **स्तम्भ-अ** | | **स्तम्भ-ब** | |
|---|---|---|---|
| (i) | जाया पत्ये कीदृशं वाचं वदतु | (क) | निमज्जतीन्दो: किरणेष्विवांक: |
| (ii) | एको हि दोषो गुणसन्निपाते | (ख) | वाष्पगद्गदया गिरा |
| (iii) | उवाच, प्रणतो वाक्यम् | (ग) | न केशा: प्रपतन्ति च |
| (iv) | न खालित्यं न पालित्यम् | (घ) | जाया पत्ये मधुमतीं वाचं वदतु |

10. 'हृदयपरिवर्तनं' इति नाटकस्य सारांशं षड्वाक्येषु लिखत। सहायतायै बिन्दव: दत्ता: – **6**

| **बिन्दव:** |
|---|
| यक्षा:, ब्राह्मणवेशधारिण:, पंच, राज्ये, मैत्रबलराज्ञ: वने वादितं, विचरन्ति, गोपालकेन, वंशीध्वनिं, शृण्वन्ति गवां, समीपे, सर्वे, अग्रे गच्छन्, गोपालक: कथयति तेषां, राजा इच्छानुरूपं, मांसरुधिरभोजनं ददाति, सर्वे हिंसां त्यजन्ति। |

**11.** अधोलिखितं नाट्यांशद्वयं पठित्वा प्रश्नान् उत्तरत –

(क) राजा – चाणूरमुष्टिकौ! सर्वप्रयत्नेन युवाभ्यामानृण्यं कर्त्तव्यम्। **1+1=2**

उभौ – शृणोतुभर्ता! करणसन्धाबन्धप्रहारैः युद्धविशेषैः सिद्धिंगच्छामः।

राजा – बाढमेवं क्रियताम्, ध्रुवसेन! प्रवेशय गोपदारकौ।

**प्रश्नाः –**

(i) चाणूरमुष्टिकौ कस्मिन् युद्धविशेषे कुशलौ आस्ताम्?

(ii) 'गोपदारकौ' इति पदेन कस्य बोधः भवति?

(ख) राजा – भो, कथं मम राज्ये निर्धनः, दीपस्य अधः अन्धकारः? **1+1=2**

लब्धदत्तः – महाराज, किं करोमि, मम भाग्यम् एव विपरीतम्।

मन्त्रीः – महाराज, किं न अभिजाना ति? एष एव एकदा वने महाराजस्य प्राणान् रक्षितवान्।

**प्रश्नाः –**

(i) लब्धदत्तः स्वनिर्धनतायाः कारणं किम् उक्तवान्?

(ii) लब्धदत्तः महाराजस्य प्राणान कुत्र रक्षितवान्?

**12.** अधोलिखितं गद्यांशं पद्यांशं च पठित्वा उभयोः प्रदत्त प्रश्नान् उत्तरत –

(क) **गद्यांशः –**

परिश्रमस्य महत्त्वं कोन जानाति। परिश्रमेण मानवः सर्वत्र सफलतां प्राप्नोति। महान् शक्तिशाली अपि परिश्रमेण विना किमपि प्राप्तुं न शक्नोति। यथा सिंहः वने प्रविश्य बाहुवलं प्रदर्श्यपशून् हन्ति आत्मनः कृते भोजनं च लभते। अत एव कथ्यते उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।

**प्रश्नाः –**

(i) मानवः सफलतां कथं प्राप्नोति? **2**

(ii) सिंहः भोजनं कथं लभते? **2**

(iii) गद्यांशस्य शीर्षकं लिखतु। **1**

(क) **पद्यांशः –**

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।

परोपकारः पुण्याय पापाय परपीऽनम्।।

**प्रश्नाः –**

(i) पुराणेषु कस्य वचनद्वयम्? **2**

(ii) परोपकारेण किं भवति? **2**

(iii) पद्यांशस्य शीर्षकं लिखतु। **1**

13. मञ्जुषापदसहायतया 'वर्षाऋतुः' इति विषयमधिकृत्य दशवाक्यानि लिखत। **1x10**

| **मञ्जुषा** |
|---|
| ग्रीष्मकालानन्तरं ऋतुः, वर्षा भवति, मेघाः आडम्बरेण वर्षन्ति, पृथ्वी, जलमयं भवति, कृषकाः हर्षेण, क्षेत्रेषु बीजानि, पादपांश्च रोपयन्ति, यत्र-तत्र जलौघः, नद्यः जलेन पूरिताः भवन्ति, वर्षा अन्नोत्पादने सहायं करोति, ऋतुषु इयं राज्ञी, मन्यते। |

14. भवान् वेदानन्दः। परीक्षा समये भवताम् उपनगरे विद्युतः अभावः अध्ययने बाधकः भवति। अतः समस्यासमाधानाय विद्युत्-अधिकारिणं प्रति पत्रं लिखतु। **6**

15. द्वयोः मित्रयोः मध्ये वृक्षारोपणसंबंधे संवादरूपेण चत्वारिवाक्यानि लिखत। **1x4=4**

16. रेखाङ्कित पदे सन्धिच्छेदं कुरुत - **1**

(क) स त्वायुषि परीक्षीणे जगामानीप्सितां गतिम्।

(ख) छायामधः सानुगतां निषेव्य।

17. रेखांङ्कितपदे का विभक्तिः किं च मूलपदम्?

(क) स्वागतम्, अत्र भवताम्। **2**

(ख) सः मैत्रबलस्य कान् गुणान् वर्णयति। **2**

18. समुचितपदनिर्माणं कृत्वा रिक्तस्थानंपूरयत - **1x4=4**

(क) वंशीकश्चित् __________ वादयति स्म। (युवन् + उचित विभक्ति)

(ख) __________ व्याघ्रः रक्ष्यते। (वन + उचित विभक्ति)

(ग) आकाशमण्डले __________ सन्ति। (ग्रहनक्षत्र + उचित विभक्ति)

(घ) तस्य __________ पौरिकः आसीत्। (नाम + उचित विभक्ति)

19. यथानिर्दिष्टं कुरुत - **1x4=4**

(क) तेन मुरलीवादनेन भवितव्यम्। (रेखांकितस्य प्रकृतिप्रत्ययः)

(ख) युष्माकम्औदार्यं निशम्य इह समागताः। (रेखांकितस्य प्रकृतिप्रत्ययः)

(ग) ईप्सितं तु मृगेन्द्रस्य मांसं यत्र तत्र संस्कृतम्। (रेखांकितस्य विग्रहं कुरुत)

(घ) हिमालयो नाम नगाधिराजः। (रेखांकितस्य विग्रहं कुरुत)

20. अधोलिखित वाक्ययोः एकम् अव्ययम् एकम् उपसर्गम् च चित्वा लिखत - **2**

(क) किं वृथा चिन्तनेन

(ख) विस्तृते आसने आस्यताम्।

## खण्ड - ख

## वैकल्पिक - I

## ( संस्कृतं संस्कृतिश्च )

**21.** अधोलिखित काव्यानां तेषां लेखकैः सहमेलनं कृत्वा लिखत – **2**

| अ | | ब | |
|---|---|---|---|
| (i) | जानकीजीवनम् | (क) | श्रीधरभास्करवर्णेकरः |
| (ii) | पाथेयशतकम् | (ख) | पंडिताक्षमारावः |
| (iii) | स्वातन्त्र्यवीरशतकम् | (ग) | रामकरणशर्मा |
| (iv) | ग्रामज्योतिः | (घ) | राजेन्द्र मिश्रः |

**22.** (क) अधोलिखितसंख्यानां कृते संस्कृतपदानि लिखत – **2**

$10^5$, $10^2$, $10^{11}$, $10^7$

(ख) लक्षगुणनोत्तरप्रणाल्याः उदाहरणं कस्मिन् ग्रन्थे प्राप्यते ? अस्याः प्रणाल्याः उपयोगं तत्र कः कृतवान् ? **2**

(ग) 'कृषिपराशरः' इति ग्रंथस्य रचयिता कः ? अस्मिन् ग्रंथे कस्य महत्त्वं सम्यक् उपवर्णितम् ? **2**

(घ) प्रकृतिः प्रतिक्षणं कस्य हितसम्पादने निरता ? **1**

**23.** बौद्ध धर्मस्य ग्रन्थाः केन नाम्ना प्रसिद्धाः ? ते कस्यां भाषायां रचिताः ? **1+1=2**

**24.** (क) कर्णवेधसंस्कारः किमर्थं क्रियते ? एष संस्कारः कथं क्रियते ? **2**

(ख) मानवः समाजस्य राष्ट्रस्य कृते योग्यः उपयोगी नागरिकः कदा भवति ? **1**

(ग) भारतीयसंस्कृतौ पुरुषार्थाः कति सन्ति ? **1**

## वैकल्पिक - II

## ( प्रयोजनमूलक संस्कृतम् )

**21.** अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत – **1x4=4**

(क) भाषादृष्ट्या __________ द्विविधम् अस्ति।

(ख) शून्यप्रयोगस्य नियमान __________ निर्मितवान्।

(ग) संस्कृतज्ञानां जीवन निर्वाहाय अनेके __________ सन्ति।

(घ) प्राच्यविज्ञानस्य आधुनिकविज्ञानेन सह __________ स्यात्।

**22.** अधोलिखितान् प्रश्नान् उत्तरत – **1x4=4**

(क) ज्यौतिषशास्त्रे कस्य ज्ञानं वर्तते ?

(ख) सर्वविध विज्ञान रत्नानि कस्मिन् कोशे सन्ति ?

(ग) आयुर्वेदाचार्यस्य पाठ्यक्रमे के प्रवेशं प्राप्नुवन्ति ?

(घ) व्यक्ति परिचये कस्य परिचयः दीयते ?

**23.** संस्कृते 'चन्दा मामा' इति पत्रिका कुतः प्रकाश्यते ? **2**

अवधिक्रमेण इयं पत्रिका कीदृशी ?

**24.** (क) संस्कृतपत्रिकायाः स्वरूपं कीदृशं भवति ? **1**

(ख) पत्रिकाणां प्रकाशनेन कः लाभः भवति ? **1**

(ग) 'संस्कृत मञ्जरी' कस्याः संस्थायाः पत्रिका अस्ति ? **1**

(घ) त्रुटिशोधने प्रयुक्तम् अधोलिखितचिह्नद्वयम् अभिप्रायेण सह मेलयत – **2**

| | **अ** | **ब** |
|---|---|---|
| (i) | (#) | (क) समीपम् आनेयम् |
| (ii) | (⁀) | (ख) वर्णयोः शब्दयोः वा अन्तरालं |

- o O o -